B.COM
Year – I
Semester – II
Paper - I

# Sanskrit - II


Course Coordinator
Dr. T. K. Narasimhan
Assistant Professor



Centre for Distance and Online Education

श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya
Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC
**Enathur, Kanchipuram 631561.**
Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Sri Chandrasekharendra Saraswathi Viswa Maha Vidyalaya**

**Sanskrit Syllabus for All under Graduate Courses**

**(BCA/BBA/B.Com/B.Sc)**

**L-2 Sanskrit** **Semester II**

## Unit - I भागः - क

**Poetry**: सुभाषितमाला I - 1 to 6 Slokas

**Prose**: Lessons 1 to 3 (From Sanskrit Pravesika)

## Unit - II भागः - ख

**Poetry**: सुभाषितमाला II - 1 to 8 Slokas

**Prose**: Lessons 4 to 6 (From Sanskrit Pravesika)

## Unit - III भागः - ग

**Grammar**:

1.अच्सन्धिः

2.हल्सन्धिः

## Unit - IV भागः - घ

**Essays**:

1.अस्माकं देशः

2.दीपावली महोत्सवः

3.संस्कृतप्रचारस्य आवश्यकता

## Unit - V भागः - ङ

**Slokas (Verses):**

1. Sowndaryalahari (10 Slokas)

**Text books**

1. **Subhashitamala**, Prepared by Dept. of Sanskrit and Indian Culture, SCSVMV University.
2. **Sowndaryalahari**

**Sri Chandrasekharendra Saraswathi Viswa Maha Vidyalaya**

**Sanskrit Syllabus for All under Graduate Courses**

**(BCA/BBA/B.Com/B.Sc)**

**L-2 Sanskrit** **Semester II**

## Unit - I भागः - क

**Poetry**: सुभाषितमाला I - 1 to 6 Slokas

**Prose**: Lessons 1 to 3 (From Sanskrit Pravesika)

## Unit - II भागः - ख

**Poetry**: सुभाषितमाला II - 1 to 8 Slokas

**Prose**: Lessons 4 to 6 (From Sanskrit Pravesika)

## Unit - III भागः - ग

**Grammar**:

1.अच्सन्धिः

2.हल्सन्धिः

## Unit - IV भागः - घ

**Essays**:

1.अस्माकं देशः

2.दीपावली महोत्सवः

3.संस्कृतप्रचारस्य आवश्यकता

**Unit - V भागः - ङ**

**Slokas (Verses):**

1. Sowndaryalahari (10 Slokas)

**Text books**

1. **Subhashitamala**, Prepared by Dept. of Sanskrit and Indian Culture, SCSVMV University.
2. **Sowndaryalahari**

# पाठमञ्जरी

# PĀṬHAMAÑJARĪ



**Published By**

**DEPARTMENT OF SANSKRIT & INDIAN CULTURE**

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**

(Deemed to be University u/s 3 of UGC Act 1956)

(Accredited with "A" Grade by NAAC)

**Enathur, Kanchipuram - 631561**

**December - 2017**

# Table of Content


| | | |
|---|---|---|
| Unit - 1 सुभाषितमाला: | | |
| सुभाषितमाला – 1 | : | 5 |
| सुभाषितमाला – 2 | : | 10 |
| सुभाषितमाला – 3 | : | 17 |
| Unit - 2 पाठाः | | |
| पाठशाला | : | 25 |
| श्रीकृष्णचरितम् | : | 29 |
| पुनस्त्वं मूषको भव | : | 33 |
| क्रीडामहोत्सवः | : | 36 |
| सिंहमूषकयोः कथा | : | 39 |
| कवेः सारमेयस्य च | : | 42 |
| Unit - 3 निबन्धाः | | |
| 1. अस्माकं देशः | : | 45 |
| 2. दीपावलिः | : | 48 |
| 3. संस्कृतप्रचारस्य आवश्यकता | : | 49 |
| Unit - 4 स्तोत्रकाव्यम् | | |
| सौन्दर्यलहरी | : | 52 |
| Unit - 5 सन्धिः | | |
| 1. स्वरसन्धिः | : | 58 |
| .2व्यञ्जनसन्धिः | : | 72 |

## सुभाषितमाला – 1

**नमामि शारदां देवीं वीणापुस्तकधारिणीम् ।**
**विद्यारम्भं करिष्यामि प्रसन्नास्तु सा सदा ॥ 1 ॥**

**नमामि** = I salute, **शारदाम्** = Śāradā (Sarasvatī), **देवीम्** = the Goddess, **वीणापुस्तकधारिणीम्** = to her, who holds Veena and scriptures, **विद्या** = process of learning, **आरम्भम्** = begin start, **करिष्यामि** = I will do, **प्रसन्नास्तु** = may she be blissful, **सा** = she, **सदा** = everytime.

***Meaning:***

Salute to the Goddess Śāradā (Sarasvatī), the upholder of Veena and books (scriptures). May she be blissful while I start my learning.

**वीणापुस्तकधारिणीम्** = वीणा च पुस्तकं च वीणापुस्तके (द्वन्द्वः), वीणापुस्तकयोः धारिणी वीणापुस्तकधारिणी (षष्ठीतत्पुरुषः), तां वीणापुस्तकधारिणीम्।

**विद्यारम्भं** = विद्यायाः आरम्भः(षष्ठीतत्पुरुषः), तं विद्यारम्भम्।

**प्रसन्नास्तु** = प्रसन्ना + अस्तु (सवर्णदीर्घसन्धिः)

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।
तस्यां हि काव्यं मधुरं तस्मादपि सुभाषितम् ॥ 2 ॥

भाषासु = among languages, मुख्या = most prominent, मधुरा / मधुरम् = sweet, दिव्या = divine, गीर्वाणभारती = Saṃskṛtam, तस्याम् = in her, हि = only, काव्यम् = poetries, तस्मादपि = than that, सुभाषितम् = moral sayings.

***Meaning:***

Among languages, the Gīrvāṇabhāratī (Saṃskṛtam) is the most prominent, sweet and divine one. In that the poetries are sweet and in poetries the moral sayings (Subhāṣītām) are much sweeter.

तस्मादपि = तस्मात् + अपि (जश्त्वसन्धिः)

**क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ।**
**क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम् ॥ 3 ॥**

क्षणशः = by every moment, कणशः = in units, च = and, एव = only, विद्याम् = knowledge, अर्थम् = wealth, साधयेत् = must be acquired, क्षणत्यागे = in the lost moment, कुतो = where, कणत्यागे = in the lost unit, धनम् = wealth.

***Meaning:***

Knowledge must be acquired in each and every moment and the wealth in units. Where is knowledge once a moment is lost and where is wealth when a unit is lost.

**कणशश्च** = कणशः + च (विसर्गसन्धिः, श्चुत्वसन्धिः)

**चैव** = च + एव (वृद्धिसन्धिः)

**क्षणत्यागे** = क्षणस्य त्यागः(षष्ठीतत्पुरुषः), तस्मिन् क्षणत्यागे।

**कणत्यागे** = कणस्य त्यागः(षष्ठीतत्पुरुषः), तस्मिन् कणत्यागे।

**गुरूणां सन्निधौ तिष्ठेत् सदैव विनयान्वितः।**
**पादप्रसारणादीनि तत्र नैव समाचरेत् ॥ 4 ॥**

**गुरूणाम्** = of the preceptor, **सन्निधौ** = in the presence, **तिष्ठेत्** = should stand, **सदैव** = every time, **विनयान्वितः** = being obedient, **पादप्रसारणादीनि** = spreading of legs and etc., **तत्र** = there, **नैव** = never, **समाचरेत्** =should do.

***Meaning:***

Being obedient, one should stand before the preceptor, and should not spread his legs in the presence of the preceptor.

पादप्रसारणादीनि = पादयोः प्रसारणम् पादप्रसारणम् (षष्ठीतत्पुरुषः), पादप्रसारणम् आदि येषां तानि पादप्रसारणादीनि (बहुव्रीहिः)।

सदैव = सदा + एव (वृद्धिसन्धिः)

नैव = न + एव (वृद्धिसन्धिः)

**काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।**
**व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥ 5 ॥**

**काव्यशास्त्रविनोदेन** = by enjoying the poetries and scriptures, **कालः** = time, **गच्छति** = passes, **धीमताम्** = of the wise men, **व्यसनेन** = by misery, **च** = and, **मूर्खाणां** = of unwise, **निद्रया** = by sleep, **कलहेन** = by quarrel, **वा** = or.

***Meaning:***

The time of the wise men passes by enjoying the poetries and scriptures while the time of unwise by misery, sleep or by quarrel.

**काव्यशास्त्रविनोदेन** = काव्यं च शास्त्रं च काव्यशास्त्रे (द्वन्द्वः), काव्यशास्त्राभ्याः विनोदः (तृतीयातत्पुरुषः), तेन काव्यशास्त्रविनोदेन।

**कालो गच्छति** = कालः + गच्छति (विसर्गसन्धिः)

तैलाद्रक्षेत् जलाद्रक्षेत् रक्षेच्छिथिलबन्धनात् ।
मूर्खहस्ते न दातव्यं एवं वदति पुस्तकम् ॥ 6॥

तैलात् = from oil, रक्षेत् = should protect, जलात् = from water, शिथिलबन्धनात् = from loose binding, मूर्खहस्ते = in the hand of an unwise, न = never, दातव्यम् = should give, एवम् = as, that, वदति = says, पुस्तकम् = scripture, book.

***Meaning:***

Scripture (Book) says that one should protect me from oil, water and from loose bindings. And one should never give me in the hand of an unwise.

**शिथिलबन्धनात्** = शिथिलं बन्धनम् शिथिलबन्धनम् (कर्मधारयः), तस्मात् शिथिलबन्धनात्।

**मूर्खहस्ते** = मूर्खस्य हस्तः मूर्खहस्तः (षष्ठीतत्पुरुषः), तस्मिन् मूर्खहस्ते।

**तैलाद्रक्षेत्** = तैलात् + रक्षेत् (जश्त्वसन्धिः)

**जलाद्रक्षेत्** = जलात् + रक्षेत् (जश्त्वसन्धिः)

**रक्षेच्छिथिलबन्धनात्** = रक्षेत् + शिथिलबन्धनात् (श्चुत्वसन्धिः)

# सुभाषितमाला – 2

**नास्ति विद्यासमो बन्धुर्नास्ति विद्यासमः सुहृत् ।**
**नास्ति विद्यासमं वित्तं नास्ति विद्यासमं सुखम् ॥ 1 ॥**

नास्ति = absence, विद्यासमः = like knowledge, बन्धुः = a relative, सुहृत् = a friend, वित्तम् = wealth, सुखम् = happiness.

***Meaning:***

A relative like knowledge is quite absent, a friend like knowledge is rare, and there is no wealth like knowledge and no happiness like knowledge.

**विद्यासमः / विद्यासमं** = विद्यायाः समः / समम्।(षष्ठीतत्पुरुषः)

**विद्यासमो बन्धुः** = विद्यासमः + बन्धुः (विसर्गसन्धिः)

**बन्धुर्नास्ति** = बन्धुः + नास्ति (विसर्गसन्धिः)

**एकेनापि सुपुत्रेण भूषितेन सुविद्यया ।**
**विराजति कुलं सर्वं चन्द्रेण रजनी यथा ॥ 2 ॥**

एकेन = by only one, अपि = even, सुपुत्रेण = good son, भूषितेन = being endowed with, सुविद्यया = right knowledge,

विराजति = shines, कुलम् = race, family, सर्वम् = entire, चन्द्रेण = by the moon, रजनी = the night, यथा = as.

***Meaning:***

The entire race shines even by only one good son being endowed with right knowledge as the night by the moon.

एकेनापि = एकेन + अपि (सवर्णदीर्घसन्धिः)

**यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ।**
**चित्ते वाचि क्रियायाञ्च साधूनामेकरूपता ॥ 3 ॥**

यथा = as, चित्तम् = the mind, तथा = according to, वाचः = the speech, क्रियाः = the actions, साधूनाम् = of the pious men, एकरूपता = equilibrium.

***Meaning:***

As the mind thinks of the pious men, the speech will also be according to that, whatever they say they bring it in the action. There is equilibrium in the thought, speech and actions of the pious men.

वाचो यथा = वाचः + यथा (विसर्गसन्धिः)

वाचस्तथा = वाचः + तथा (विसर्गसन्धिः)

क्रियायाञ्च = क्रियायाम् + च (श्चुत्वसन्धिः)

**सुशिक्षितः स मन्तव्यो यः कुर्याद्देशचिन्तनम् ।**
**इत्येषा लोकमान्योक्तिः सर्वदा हृदि वर्तताम् ॥ 4 ॥**

सुशिक्षितः = well educated, सः = He, मन्तव्यः = is considered, यः = one who, कुर्यात् = should do, देशचिन्तनम् = thinking about the country, इति = Thus, एषा = This, लोकमान्योक्तिः = universally accepted rule, सर्वदा = always, हृदि = in the heart, वर्तताम् = should be there.

***Meaning:***

He is considered to be well educated, who thinks about the country. Thus, this is the universally accepted rule, and it should be always in the heart.

देशचिन्तनम् = देशस्य चिन्तनम् (षष्ठीतत्पुरुषः)

लोकमान्योक्तिः = लोकेन मन्यते यत् तत् लोकमान्यः (बहुव्रीहिः), लोकमान्यः उक्तिः लोकमान्योक्तिः (कर्मधारयः)।

स मन्तव्यः = सः + मन्तव्यः (विसर्गसन्धिः)

मन्तव्यो यः = मन्तव्यः + यः (विसर्गसन्धिः)

कुर्याद्देशचिन्तनम् = कुर्यात् + देशचिन्तनम् (जश्त्वसन्धिः)

इत्येषा = इति + एषा (यान्तवान्तादेशसन्धिः)

लोकमान्योक्तिः = लोकमान्य + उक्तिः (गुणसन्धिः)

**मुखं पद्मदलाकारं वाणी चन्दनशीतला ।**

**हृदयं क्रोधसंरक्तं त्रिविधं धूर्तलक्षणम् ॥ 5 ॥**

मुखम् = Face, पद्मदलाकारम् = petal of the lotus, वाणी = speech, चन्दनशीतला = cool as sandal, हृदयम् = heart, क्रोधसंरक्तम् = red in anger, त्रिविधम् = three types, धूर्तलक्षणम् = characteristics of the wicked.

***Meaning:***

These are the three characteristics of a wicked person – face which looks like the petal of the lotus; speech which seems to be cool as sandalwood and the heart which is filled with full of anger.

पद्मदलाकारम् = पद्मस्य दलम् पद्मदलम् (षष्ठीतत्पुरुषः), पद्मदलम् इव आकारम् पद्मदलाकारम् (कर्मधारयः)।

चन्दनशीतला = चन्दनम् इव शीतला (कर्मधारयः)।

क्रोधसंरक्तम् = क्रोधेन संरक्तम् (तृतीयातत्पुरुषः)।

त्रिविधम् = तिस्राणां विधीनां समाहारः (द्विगुः)

धूर्तलक्षणम् = धूर्तस्य लक्षणम् (षष्ठीतत्पुरुषः)

पद्मदलाकारम् = पद्मदल + आकारम् (सवर्णदीर्घसन्धिः)

**रविश्चन्द्रो घनाः वृक्षाः नदी गावश्च सज्जनाः।**
**एते परोपकाराय लोके देवेन निर्मिताः ॥ 6 ॥**

रविः = Sun, चन्द्रः = moon, घनाः = dark, वृक्षाः = trees, नदी = river, गावः = cows, च = and, सज्जनाः = pious men, एते = these, परोपकाराय = for the welfare of others, लोके = in the society, देवेन = by the God, निर्मिताः = made.

***Meaning:***

Sun, moon, dark trees, river, cows and pious men are made by the God for the welfare of others in the society.

परोपकाराय = परस्य उपकारः परोपकारः (षष्ठीतत्पुरुषः), तस्मै परोपकाराय।

रविश्चन्द्रो = रविः + चन्द्रः (विसर्गसन्धिः, श्चुत्वसन्धिः)

चन्द्रो गावः = चन्द्रः + गावः (विसर्गसन्धिः)

गावश्च = गावः + च (विसर्गसन्धिः, श्चुत्वसन्धिः)

सज्जनाः = सत् + जनाः (श्चुत्वसन्धिः)

परोपकाराय = पर + उपकाराय (गुणसन्धिः)

**राष्ट्रध्वजो राष्ट्रभाषा राष्ट्रगीतं तथैव च ।**

**एतानि मानचिह्नानि सर्वदा हृदि धार्यताम् ॥ 7 ॥**

**राष्ट्रध्वजः** = the national flag, **राष्ट्रभाषा** = the national language, **राष्ट्रगीतम्** = national song (anthem), **तथैव** = as well as, **च** = and, **एतानि** = these, **मानचिह्नानि** = symbol of honours, **सर्वदा** = always, **हृदि** = in the heart, **धार्यताम्** = should be there.

***Meaning:***

The national flag, national language and national song (anthem) are the symbol of honours, and they should be always there in the heart.

राष्ट्रध्वजः = राष्ट्रस्य ध्वजः (षष्ठीतत्पुरुषः)

राष्ट्रभाषा = राष्ट्रस्य भाषा (षष्ठीतत्पुरुषः)

राष्ट्रगीतम् = राष्ट्रस्य गीतम् (षष्ठीतत्पुरुषः)

मानचिह्नानि = मानस्य चिह्नानि (षष्ठीतत्पुरुषः)

राष्ट्रध्वजो राष्ट्रभाषा = राष्ट्रध्वजः + राष्ट्रभाषा (विसर्गसन्धिः)

तथैव = तथा + एव (वृद्धिसन्धिः)

आलस्येन गतं दीर्घं जीवितं नैव जीवितम् ।
क्षणमेकं सुयत्नेन यो जीवति स जीवति ॥ 8 ॥

आलस्येन = with laziness, गतम् = passed, दीर्घम् = long जीवितम् = life, नैव = never, क्षणम् = moment, एकम् = single, सुयत्नेन = with some great efforts, यः = one who, जीवति = lives, सः = he.

***Meaning:***

A long life if it is passed with laziness is never considered as a life. He actually lives who did some great efforts in his life even though if it is for a single moment.

नैव = न + एव (वृद्धिसन्धिः)

यो जीवति = यः + जीवति (विसर्गसन्धिः)

स जीवति = सः + जीवति (विसर्गसन्धिः)

# सुभाषितमाला – 3

विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥ 1 ॥

विद्वत्वम् = wisdom, च = and, नृपत्वम् = royalty, नैव = negative, तुल्यम् = should be compared, कदाचन = ever, स्वदेशे = in his own country, पूज्यते = is worshipped, राजा = king, विद्वान् = wise person, सर्वत्र = everywhere.

***Meaning:***

Wisdom and royalty should not be compared ever. A king is worshipped only in his own country where as a wise person at everywhere.

नैव = न + एव (वृद्धिसन्धिः)

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ॥ 2 ॥

माता = mother, शत्रुः = enemy, पिता = father, वैरी = rival, येन = by whom, बालः = ward, child, न = is not, पाठितः = given

education, शोभते = shine, सभामध्ये = in the get together, हंसमध्ये = among the swans, बकः = a duck, यथा = as, like.

***Meaning:***

Mother is considered as enemy and father as rival, by whom their ward is not given any education. They never shine in the get together as a duck among the swans.

सभामध्ये = सभायाः मध्ये (षष्ठीतत्पुरुषः)

हंसमध्ये = हंसानां मध्ये (षष्ठीतत्पुरुषः)

बालो न = बालः + न (विसर्गसन्धिः)

बको यथा = बकः + यथा (विसर्गसन्धिः)

**दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन् ।**

**मणिना भूषितः सर्पः किमसौ न भयंकरः ॥ 3 ॥**

दुर्जनः = a wicked, परिहर्तव्यः = should be neglected, विद्यया = with knowledge, अलङ्कृतः = decorated, अपि सन् = even if, मणिना = by the gem, भूषितः = decorated, सर्पः = the snake, किमसौ = is (interrogative) भयंकरः = furious.

***Meaning:***

A wicked should be neglected even if he is decorated with knowledge. Is not the snake decorated by the gem be furious ?

**परिहर्तव्यो विद्यया** = परिहर्तव्यः + विद्यया (विसर्गसन्धिः)

**विद्ययालङ्कृतः** = विद्यया + अलङ्कृतः (सवर्णदीर्घसन्धिः)

**अलङ्कृतोऽपि** = अलङ्कृतः + अपि (विसर्गसन्धिः)

**प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।**

**तस्मात्तदेव वक्तव्यं वचने का दरिद्रता ॥ 4 ॥**

**प्रियवाक्यप्रदानेन** = by delivering good speech, **सर्वे** = all, **तुष्यन्ति** = become happy, **जन्तवः** = animals, **तस्मात्** = Therefore, **तदेव** = such, **वक्तव्यम्** = must be spoken, **वचने** = in speaking, **का** = what, **दरिद्रता** = is lost.

***Meaning:***

Even all the animals become happy by delivering good speech. Therefore such must be spoken. What is lost in speaking such speech ?

प्रियवाक्यप्रदानेन = प्रियं वाक्यं प्रियवाक्यम् (कर्मधारयः), प्रियवाक्यस्य प्रदानम् प्रियवाक्यप्रदानम् (षष्ठीतत्पुरुषः), तेन प्रियवाक्यप्रदानेन।

तदेव = तत् + एव (जश्त्वसन्धिः)

**अद्यापि यस्य गायन्ति कीर्तिः कविवरा अपि ।**
**नमामः कालिदासं तं भारतीयं महाकविम् ॥ 5 ॥**

अद्य = today, अपि = even, यस्य = whose, गायन्ति = is being sung, कीर्तिः = glory, कविवराः = the great poets, नमामः = we salute, कालिदासम् = Kalidasa, तम् = that, भारतीयम् = Indian महाकविम् = great poet.

***Meaning:***

We salute that great Indian poet Kalidasa, whose glory is being sung by the great poets even today.

अद्यापि = अद्य + अपि (सवर्णदीर्घसन्धिः)

कविवरा अपि = कविवराः + अपि (विसर्गसन्धिः)

**शीलं सद्गुणसंपत्तिः ज्ञानं विज्ञानमेव च ।**
**उत्साहो वर्धते येन वाचनं हितकारकम् ॥ 6 ॥**

शीलम् = humbleness, सद्गुणसंपत्तिः = good characteristics, ज्ञानम् = wisdom, विज्ञानम् = knowledge, एव = only, च = and

उत्साहः = encouragement, वर्धते = develop, येन = by which, वाचनम् = speech, हितकारकम् = beneficiary.

***Meaning:***

Our speech should be beneficiary to others, by which humbleness, good characteristics, wisdom, knowledge and encouragement will develop.

सद्गुणसंपत्तिः = सद्गुणानां संपत्तिः (षष्ठीतत्पुरुषः)

सद्गुणसंपत्तिः = सत् + गुणसंपत्तिः (जश्त्वसन्धिः)

उत्साहो वर्धते = उत्साहः + वर्धते (विसर्गसन्धिः)

**सदाचारेण सर्वेषां शुद्धं भवति मानसम् ।**
**निर्मलं च विशुद्धं च मानसं देवमन्दिरम् ॥ 7 ॥**

सदाचारेण = by good conduct, सर्वेषाम् = of all, शुद्धम् = pure, भवति = becomes, मानसम् = the mind, निर्मलम् = neat, च = and, विशुद्धम् = pure, देवमन्दिरम् = abode of god.

***Meaning:***

By good conduct, the mind becomes pure of all. And neat and clean mind is the abode of god.

सदाचारेण = सत् आचारः सदाचारः (कर्मधारयः) तेन सदाचारेण।

देवमन्दिरम् = देवस्य मन्दिरम् (षष्ठीतत्पुरुषः)।

सदाचारेण = सत् + आचारेण (जश्त्वसन्धिः)

**सुखस्यानन्तरं दुःखं, दुःखस्यानन्तरं सुखम् ।**
**न नित्यं लभते दुःखं न नित्यं लभते सुखम् ॥ 8 ॥**

सुखस्य = of happiness, अनन्तरम् = (comes) after, दुःखम् = unhappiness, न = never, नित्यम् = regularly, लभते = attain.

***Meaning:***

Unhappiness comes after happiness, happiness comes after unhappiness. One will never attain happiness or unhappiness regularly.

सुखस्यानन्तरम् = सुखस्य + अनन्तरम् (सवर्णदीर्घसन्धिः)

दुःखस्यानन्तरम् = दुःखस्य + अनन्तरम् (सवर्णदीर्घसन्धिः)

**जनैर्जनहितार्थाय जनानामेव निर्मितम् ।**
**लोकतन्त्रं भारतस्य वसुधायां विराजते ॥ 9 ॥**

जनैः = by the people, जनहितार्थाय = for the welfare of the people, जनानाम् = of the people, निर्मितम् = was made, लोकतन्त्रम् = democracy, भारतस्य = of India, वसुधायाम् = in the world, विराजते = shines.

***Meaning:***

The Indian democracy shines in the world which is of the people of India, which was made by the people, for the welfare of the people.

जनहितार्थाय = हितानाम् अर्थः हितार्थः (षष्ठीतत्पुरुषः), जनानां हितार्थः जनहितार्थः (षष्ठीतत्पुरुषः), तस्मैः जनहितार्थाय।

जनैर्जनहितार्थाय = जनैः + जनहितार्थाय (विसर्गसन्धिः)

जनहितार्थाय = जनहित + अर्थाय (सवर्णदीर्घसन्धिः)

**नालिकागतमपि कुटिलं न भवति सरलं शुनः पुच्छम्।**
**तद्वत् खलजनहृदयं बोधितमपि नैव याति माधुर्यम् ॥ 10 ॥**

नालिकागतम् = inserted into a pipe, अपि = even, कुटिलम् = bent, न = never, भवति = becomes, सरलम् = straight, शुनः = of the dog, पुच्छम् = tail, तद्वत् = alike, खलजनहृदयम् = the heart of the wicked person, बोधितम् = is advised, नैव = never, याति = becomes, माधुर्यम् = soft.

***Meaning:***

The bent tail of the dog never becomes straight even if it is inserted into a pipe. Alike the heart of the wicked

person never becomes soft even if he is advised to be good.

**नालिकागतम्** = नालिकायां गतम् (सप्तमीतत्पुरुषः)।

**खलजनहृदयम्** = खलः जनः खलजनः (कर्मधारयः) खलजनानां हृदयम् खलजनहृदयम् (षष्ठीतत्पुरुषः)

**तद्वत्** = तत् + वत् (जश्त्वसन्धिः)

**नैव** = न + एव (वृद्धिसन्धिः)

# पाठः – 1 पाठशाला

एषा पाठशाला अस्ति। एतस्याः भवनं रम्यं विशालं च। अत्र बहवः वर्गकक्षाः सन्ति। वर्गकक्षासु कृष्णफलकाः सन्ति। कृष्णफलके वयं प्रतिदिनं बोधवचनानि लिखामः। बहुविधासु कक्षासु वयम् उपविशामः स्वाध्यायान् च पठामः।

अस्माकं अध्यापकाः च स्वविषयेषु प्रवीणाः अध्यापने च कुशलाः। ते छात्रेषु पुत्रवत् स्निह्यन्ति। वर्गेषु शिक्षकाः पाठान् पठन्ति छात्राः अनुपठन्ति च। अध्यापकाः फलकेषु यत् लिखन्ति, वयं तत् अनुलिखामः। अध्यापकाः छात्रेभ्यः सन्मार्गम् उपदिशन्ति। विद्यालये वयं विविधानां विषयाणां ज्ञानम् अधिगच्छामः।

पाठशालायां समृद्धः ग्रन्थालयः अस्ति। पुस्तकानां वाचनेन ज्ञानं परिपूर्णं भवति। तथैव शास्त्रप्रयोगार्थं छात्राः प्रयोगशालां गच्छन्ति। प्रयोगैः तेषां विषयज्ञानं पर्याप्तं भवति। पाठशालायाः विशाले सभागृहे कार्यक्रमाः भवन्ति। स्पर्धासु छात्राणां सहभागः भवति। तेन विविधासु कलासु छात्राः प्रावीण्यम् अधिगच्छन्ति।

विद्यालयं परितः विस्तीर्णं क्रीडाङ्गणम् अस्ति। तत्र छात्राः विविधाः क्रीडाः क्रीडन्ति। व्यायामेन छात्राः बलसम्पन्नाः भवन्ति। छात्राणां क्रीडास्पर्धाः अपि सम्भवन्ति। एवम् एषा पाठशाला ज्ञानं, बलं, संस्कारान् च यच्छति।

एषा पाठशाला विद्यादेवतायाः शारदायाः निवासस्थानम् इति प्रसिद्धं खलु।

---

## GLOSSARY

| | | | |
|---|---|---|---|
| भवनम् | Building | बहु | Many |
| वर्गकक्षा | Class-room | कृष्णफलकम् | Black board |
| लिख् | To write | उप विश् | To sit |
| पठ् | To read | प्रतिदिनम् | Daily |
| स्निह् | To love | पर्याप्तं | Sufficient |
| परितः | around | उप दिश् | To Advise |
| अनु पठ् | To read after | सम् भू | To be possible |
| अनु लिख् | To write after | अधिगम् | To accomplish |

## EXERCISES

**I.** ***Write answers to the following questions in English.***

1. How is the school building ?
2. What is the speciality of the class room ?
3. What merits of the school-teachers are mentioned ?
4. In what ways do the pupils get knowledge in the school ?
5. What do the pupils gain from the experiments in the laboratory ?
6. What is the scheme the school to attain proficiency in different arts ?
7. What are the advantages of a play ground ?
8. What does the school offer to pupils ?

**II.** ***Complete the sentences using proper words.***

1. ................................................... छात्रेषु स्निह्यन्ति।
2. वयं ........................................ कृष्णफलके लिखामः।
3. ................................ शास्त्रप्रयोगार्थं प्रयोगशालां गच्छन्ति।
4. छात्राः व्यायामेन ............................................. भवन्ति।

**III.** ***Fill in the blanks by choosing suitable word from those given in the brackets.***

(प्रावीण्यम्, अध्यापने, समृद्धः)

1. अस्माकम् अध्यापकाः .................................... कुशलाः।

2. पाठशालायां ........................................ ग्रन्थालयः अस्ति।

3. विविधासु कलासु छात्राः ............................ अधिगच्छन्ति।

**IV. *Translate the sentences into English.***

1. बालिकाः चित्रं पश्यन्ति।
2. बालकाः क्रीडन्ति।
3. क्रीडाङ्गणं विशालम् अस्ति।
4. छात्राः कन्दुकेन क्रीडन्ति।
5. अहं पुस्तकं पठामि।

1. ..............................................................................
2. ..............................................................................
3. ..............................................................................
4. ..............................................................................
5. ..............................................................................

# पाठः – 2 श्रीकृष्णचरितम्

अस्माकं भारतीयानां रामकृष्णौ आदर्शौ। तयोः भगवान् श्रीकृष्णः सर्वेषाम् अतीवप्रियः अस्ति। श्रावणमासे कृष्णपक्षस्याष्टमः दिवसः श्रीकृष्णस्य जन्मतिथिः। यदुवंशे प्रसिद्धः वसुदेवः तस्य जनकः। देवकी च जननी। कंसः देवकीवसुदेवौ कारागृहे क्षिपति। तयोः च सर्वाणि अपत्यानि हिंसति। अतः वसुदेवः श्रीकृष्णं गोकुलं नयति। गोकुले नन्दस्य गृहे सः वसति। बाल्ये बलरामेण गोपैः च सह श्रीकृष्णः विविधाः क्रीडाः क्रीडति। यशोदा नन्दः च श्रीकृष्णे अतीव स्निह्यतः।

श्रीकृष्णे चरित्रे विविधाः कथाः प्रसिद्धाः सन्ति। कदाचित् गोपः इन्द्रयागेन इन्द्रं पूजयन्ति स्म। तदानीं श्रीकृष्णः गोपान् उपदिशति – "गोपूजनं, वनस्पतिपूजनं, गिरिपूजनं च अस्माकं कर्त्तव्यम् इति।" ततः श्रीकृष्णवचनात् गोपाः इन्द्रयागात् विरमन्ति, गोवर्धनं पूजयन्ति च। तेन देवेन्द्रः कुप्यति। सः धारासारैः गोकुलं वर्षति। अतिवृष्ट्या पीडिताः गोपाः श्रीकृष्णं शरणं व्रजन्ति। तेन सह गोवर्धनं चाश्रयन्ति। स्वयं समर्थः अपि श्रीकृष्णः गोपैः सह गोवर्धनम् उद्धरते। सर्वे अपि गोपाः श्रीकृष्णः इव हस्तेन वा काष्टेण

वा गोवर्धनं धारयन्ति। गोपानां सङ्कटं श्रीकृष्णस्य साहाय्येन नश्यति। एवं श्रीकृष्णः ऐक्यमहत्त्वं स्वस्याचरणेन एव कथयति।

एवं विधाः बहवः श्रीकृष्णकथाः वर्णयन्ति यत् श्रीकृष्णः उत्कृष्टः शासकः श्रेष्ठः नायकः दुष्टानां संहारकः सज्जनानां रक्षकः चतुरः संघाटकः च इति।

श्रीकृष्णस्य गीता आदर्शभूतं जीवनम् उपदिशति।

---

## GLOSSARY

| | | | |
|---|---|---|---|
| अष्टमः | Eighth | जनकः | Father |
| कारागृहम् | Jail | अपत्यम् | Child |
| अतः | So, Therefore | सह | With |
| स्निह् | To love | इन्द्रयागः | Sacrifice in honour of Indra |
| ततः | Thereupon | वि रम् | To stop |
| धारासारः | Torrents | व्रज् | To go |
| उद् धृ (उदर्) | To lift up | नश् | To ruin |
| जन्मतिथिः | Birthday | जननी | Mother |
| नि क्षिप् | To put into | हिंस् | To kill |

| | | | |
|---|---|---|---|
| बाल्यम् | Childhood | गोपः | Cowherd |
| कदाचित् | Once | तदानीम् | Then |
| गिरिपूजनम् | Worship of Mountain | वृष् | To resort, To take |
| कथ् | To tell | संहारकः | Destroyer |
| वर्ण् | To describe | | |

## EXERCISES

**I. *Answer the following questions in English.***

1. Which is the birthday of Sri Krishna ?
2. Write down the names of Sri Krishna's parents and also one name of Sri Krishna which is derived from his father's name and one from his mother's name.
3. Why did Vasudeva take Sri Krishna to Gokula ? Who protected and nourished him there ?
4. How did the cowherds worship Indra ? How did Sri Krishna stop them from it ?
5. Why was Indra angry ? What was the result of it ?
6. How did Sri Krishna protect the cowherds from heavy rains ?

7. What lessons has Sri Krishna taught in this story ?
8. What merits did Sri Krishna have ?

**II.** ***Complete the following sentences by using suitable forms of the words in brackets.***

1. श्रीकृष्णः (गोपः) स्निह्यति।

.......................................................................................

2. (सर्प) कर्पूरगन्धः अतीव प्रियः।

.......................................................................................

3. अर्जुनः श्रीकृष्णं (शरणं) व्रजति।

.......................................................................................

4. लक्ष्मणः अपि (राम) सह वनं गच्छति।

.......................................................................................

5. धीराः (स्वकार्य) कदापि न विरमन्ति।

.......................................................................................

6. बालाः (कन्दुकं) क्रीडन्ति।

.......................................................................................

## पाठः – 3    पुनस्त्वं मूषको भव

एकस्मिन् तपोवने कश्चन मुनिः निवसति स्म। एकदा सः स्नानार्थं नदीं गच्छति। तदा कस्यचित् काकस्य मुखे सः मूषकं पश्यति। सः मूषकः दीनम् आक्रोशति – "रक्ष माम्" इति। तदा सः मुनिः वायसं प्रति पाषाणं क्षिपति। काकस्य मुखात् मूषकः पतति। मुनिः मूषकम् आश्रमम् आनयति पालयति च।

कदाचित् भयाकुलः मूषकः मुनिम् उपगच्छति। मुनिः पृच्छति – "वद कस्मात् तव भयम् ?" इति। "मार्जारात्" इति मूषकः कथयति। मुनिः वदति – "गच्छ, त्वम् अपि मार्जारः भव। सुखेन क्रीड। चिरं जीव च" इति। तदा निर्भयः सः मार्जारः सुखेन विहरति।

अथ अनन्तरम् एकः कुक्कुरः तं मार्जारम् अभिधावति। तदा सः मार्जारः पुनः मुनिम् उपगच्छति वदति च – "अधुना कुक्कुरः मम भयकारणम्" इति। मुनिः वदति – "गच्छ त्वम् अपि कुक्कुरः भव परिरक्ष च आत्मानम्" इति।

ततः कोऽपि व्याघ्रः तं कुक्कुरम् अभिधावति। सः व्याघ्रभयेन मुनेः शरणं गच्छति पृच्छति च – "वदतु कथं रक्षाणि आत्मानम्"

इति। ऋषिः प्रतिवदति – "त्वम् अपि व्याघ्रः भव। रक्ष च आत्मानम्" इति। तेन आनन्दितः सः व्याघ्रः सर्वत्र विहरति।

अथ जनाः तं पश्यन्ति परस्परं वदन्ति च – "पश्यत भो एतं व्याघ्रम् ! पूर्वं एषः एव मूषकः आसीत्।" इति। ततः कृद्धः सः व्याघ्रः जनान् प्रति धावति वदति च – "व्याघ्रः एव अहम्" इति। जनाः वदन्ति – "यदि त्वं व्याघ्रः तर्हि भक्षय एतं मुनिम्। पश्यामः तव अपि सामर्थ्यम्" इति। व्याघ्रः ततः मुनिम् अभिधावति। मुनिः तपोबलेन मूषकस्य आगमनस्य हेतुम् अवगच्छति। क्रुद्धः सः तं व्याघ्रं "पुनः त्वं मूषकः भव" इति शपति। तदा एव सः मूषकः अविवेकस्य फलम् अनुभवति।

---

## GLOSSARY

| | | | |
|---|---|---|---|
| एकस्मिन् | In one | मूषकः | Rat |
| स्नानार्थम् | For taking bath | दीनम् | Pitiably |
| कस्यचित् | Of someone | आक्रोशः | To cry out |
| वायसः | Crow | प्रति | Towards |
| भयाकुलः | Afraid off | परि रक्ष् | To guard |
| आत्मानम् | To oneself | उप् गच्छ | To go near |

| | | | |
|---|---|---|---|
| प्रच्छ् | To ask | मार्जारः | Cat |
| कुक्कुरः | Dog | अभि धाव् | To attack |
| अधुना | Now | व्याघ्रः | Tiger |
| शप् | To curse | फलम् | Fruit, Result |

## EXERCISES

**I.** ***Answer the following questions.***

1. Why did the sage take pity on the rat ? How did he protect it ?
2. Which forms was the rat turned into by the sage on the strength of his penance ? Why ?
3. What did the people say when they saw the tiger ? What was the result ?
4. What did the sage curse the tiger ? Why ?
5. What lesson is taught in this story ?

# पाठः – 4 क्रीडामहोत्सवः

राजेन्द्रः अयि प्रशान्त ! प्रभाते एव त्वं त्वरया कुत्र प्रतिष्ठसे ?

प्रशान्तः भोः राजेन्द्र ! अद्य अस्माकं नगरे महान् उत्सवः विद्यते।

राजेन्द्रः किं वा निमित्तम् एतस्य उत्सवस्य ?

प्रशान्तः मित्र अद्य विभागीयः क्रीडामहोत्सवः आरभते अस्माकं नगरे। न बुध्यसे वा एतस्मिन् विषये किमपि?

राजेन्द्रः नहि नहि।

प्रशान्तः भवतु नाम। परं त्वं संगच्छसे वा मया सह क्रीडाङ्गणे ?

राजेन्द्रः आम्। निश्चितम्। एहः अहं प्रतिष्ठे।

प्रशान्तः राजेन्द्र ! तत्र अद्य क्रीडास्पर्धाः प्रवर्तन्ते। विविधेभ्यः नगरेभ्यः आगताः छात्राः सौहार्दपूर्णं परस्परं क्रीडन्ति।

राजेन्द्रः तत्र पारितोषिकाणि अपि विद्यन्ते वा ?

प्रशान्तः अथ किम्। निश्चितमेव। अस्माकं विद्यालयः तु प्रतिवर्षं किमपि मानचिह्नं विन्दते एव।

राजेन्द्रः अद्यापि तथा एव भवतु।

प्रशान्तः अवश्यमेव। न कोऽपि सन्देहः तत्र।

राजेन्द्रः परं त्वम् अपि लभसे वा किमपि पारितोषिकम् अद्य ?

प्रशान्तः आम्। निश्चितमेव किमपि पारितोषिकम्। अहं कामये एव।

राजेन्द्रः भवतु एवमेव। ते यशः अहम् अपि प्रार्थये। शुभास्ते पन्थानः सन्तु।

---

## GLOSSARY

| | | | |
|---|---|---|---|
| अयि | Oh | कुत्र | Where |
| विद् | To be | आरभ् | To begin |
| सम् गच्छ् | To go together | क्रीड् | To play |
| मानचिह्नम् | Medal of honour | त्वरा | Haste |
| कम् | To desire | बुध् | To Know |
| विभागीयः | Divisional | प्रवृत्तः | Begin (n) |
| सौहार्दपूर्णम् | In friendly spirit | लभ् | To get |
| विन्द् | To get | प्र अर्थ् | To pray |

## EXERCISES

I. ***Answer the following questions in English.***

1. Where was Prasanth going hastily ?

2. Who met him on the road ?

3. Did Rajendra knows about the sport-meet ?

4. What was the special aspect of the sports-meet ?

5. What did Rajendra wish ?

II. ***Complete the following sentences by using proper forms of the words in brackets.***

1. त्वं त्वरया कुत्र (प्र + स्था)?

2. अद्य अस्माकं नगरे महान् उत्सवः (विद्)।

3. अहं किमपि (पारितोषक) कामये एव।

4. अस्माकं विद्यालयः तु प्रतिवर्षं किमपि मानचिह्नं (लभ्)।

III. ***Translate the following into English.***

1. क्रीडया व्यायामः भवति।

2. व्यायामेन अङ्गानि पुष्टानि जायन्ते।

3. एवं क्रीडा व्यायामः च बालानाम् उपकाराय एव।

## पाठः – 5 सिंहमूषकयोः कथा

कस्मिंश्चिदरण्ये वसति स्म कोऽपि सिंहः। पर्वतस्य गुहायां सः दिवा अस्वपत् रात्रौ च वने इतस्ततः परिभ्रमन् पशूनभक्षयत्। कदाचित् प्रभूतमाहारं कृत्वा अयं सिंहः कस्यचित् वृक्षस्य छायायां सुखेन अश्वपत्। ततः बहवः मूषकाः बिलात् निर्गत्य सानन्दं सिंहस्य शरीरे अनृत्यन् इतस्ततः। तेन पीडितः सिंहः प्रबुद्धः अभवत्। तं प्रबुद्धं दृष्ट्वा पलायन्ते सर्वे मूषकाः बिलम्। तेषु कमपि मूषकमगृह्णात् सिंहः करतलेन। तदा सः मूषकः आर्तस्वरेण अवदत् – "भो महाराज ! त्वं किल पशूनां राजा। प्रसिद्धः तव पराक्रमः। अहं तु क्षुद्रः जन्तुः। मम अपराधं तावत् क्षमस्व। मां मा जहि। मयि दयां कुरु। कदाचिदहं करिष्यामि तव साहाय्यम् इति।" एतत् तस्य आर्तवचनं श्रुत्वा सिंहः तममुञ्चत्।

गच्छता कालेन कश्चन व्याधः तस्मिन्नेव वृक्षे जालमबध्नात्। तस्मिन् जाले पतितः सः सिंहः। तदा बहिः आगन्तुम् असमर्थः सः उच्चैः आक्रोशत्। तस्य आक्रोशमश्रृणोत् सः मूषकः। शीघ्रं सिंहस्य समीपे गत्वा सः अवदत् – "भो महाराज ! अलं भयेन। एषः अहं तव दासः। अहं त्वां मोचयामि अस्मात् जालात् इति।" अकृन्तत् च

सत्वरं तत् जालं दन्तैः। ततः उदपतत् सिंहः तस्मात् जालात् अवदत् च – "अहो कृतज्ञता मम मित्रस्य इति।"

---

## GLOSSARY

| | | | |
|---|---|---|---|
| व्याधः | Hunter | मूषकः | Rat |
| अवसत् | Lived | अभ्रमत् | Wandered |
| अवदत् | Told | अमुञ्चत् | Set free |
| अभक्षयत् | Ate | जालम् | Net |

## EXERCISES

**I.** ***Answer the following questions.***

1. कुत्र अवसत् सिंहः ?
2. किं करोति सिंहः दिवा-रात्रौ ?
3. अस्यां कथायां कैः पीडितः सः सिंहः ?
4. सिंहेन गृहीतः मूषकः किम् अवदत् ?
5. अनन्तरं कुत्र पतितः सः सिंहः ?
6. तदा कः तस्य सहाय्यम् अकरोत् ?

II. *वाक्यानि क्रमेण लिखन्तु।*

1. मूषकस्य वचनेन प्रीतः सः सिंहः तममुञ्चत्।
2. तस्य आक्रोशं श्रुत्वा सः एव मूषकः तं प्रति आगतः।
3. गच्छता कालेन सः एव सिंहः तस्य वृक्षस्य समीपे जाले पतितः।
4. कश्चित् सिंहः कश्चित् वृक्षस्य छायायां सुखमस्वपत्।
5. तदा मूषकः दीनस्वरेण अवदत्।
6. सः तत् जालं स्वदन्तैः अकृन्तत् सिंहम् अमोचयत् च।
7. भो महाराज ! त्वं सर्वेषां पशूनां राजा।
8. मयि दयां कुरु इति।
9. तदा सः दुःखेन उच्चैः आक्रोशत्।
10. तस्य शरीरे बहवः मूषकाः अनृत्यन्।
11. मूषकः अवदत् – हे महाराज ! अलं भयेन इति।
12. तैः पीडितः सः प्रबुद्धः अभवत्।
13. तेषु कमपि मूषकं करेण अधारयत्।

# पाठः – 6 कवेः सारमेयस्य च

अस्ति कस्मिंश्चित् नगरे कश्चन कविः। गृहे पालितः कोऽपि सारमेयः तस्य प्रियः आसीत्। परस्परं मित्रभावः आसीत् तयोः। प्रतिदिनं सः कविः तं सारमेयं सायंकाले बहिरानयति। एवं कदाचित् कस्यापि तडागस्य तटं तौ आगच्छताम्।

तडागस्य तटं सायंकाले अतीव रमणीयं दृश्यते। भूषयन्ति समन्ततः दूर्वाङ्कुराः भूमिम्। शोभते च तेषां हरितः वर्णः आरक्तेन सन्धिप्रकाशेन। तडागस्य जलं शीतलं स्वच्छं च वर्तते। शीतः पवनः मन्दं वहति। तेन च अल्पाः तरङ्गाः तत्र समुद्भवन्ति। तेषां चरमाः भागाः सन्धिप्रकाशेन द्योतन्ते। तदतीव मनोहरं तडागस्य स्वरूपम्।

तत्रैव शिलायामतिष्ठत् सः कविः पुरतः चापश्यन् प्रस्फुटं कमलम्। तस्य पाटलेन वर्णेन मोहितः सः अवदत् – "अहो ! रुचिरमेतत् कमलम्। अभिनवानि अस्य दलानि। कोमलः अस्य अन्तर्भागः। वर्तुला च आकृतिः। कथमपि एतत् ग्रहीतुमिच्छामि।"

कमलं कान्तं कोमलं गर्वं कुङ्कुमवर्णं गोलाकारम्।
जलदेवी खलु प्रसन्नहृदया मुखकमलेन हि विहसति मन्ये॥

इति शीघ्रमेव पद्यरूपेण गायति स्म स्वीयं मनोरथम्। तस्य हस्ते आसीत् वेत्रयष्टिः। तस्याः वर्तुलप्रान्तभागेन तत् कमलं समीपम् आनेतुं कविः अयतत्। अनेकशः सः यत्नमकरोत् परं तत् कमलं सत्वरमपासर्पत्। एवं विफलः जातः कवेः यत्नः। तत् दृष्ट्वा तस्य सारमेयः सहसा एव न्यमज्जत् जले अतरत् च तत् कमलं प्रति। दन्तैः सः तत् कमलं नालादलुनात् सुखेन गृहीत्वा स्वामिनः समीपम् आनयत्। तदा तत् कमलम् अगृह्णात् कविः परामृशत् च हस्तेन सारमेयम्। अनेन सारमेयस्य चेष्टितेन संतुष्टः सः कविः अवदत् – "अहो ! अद्भुतं खलु मम मित्रस्य बुद्धिचातुर्यम्। पशवः अपि एवं मनुष्यस्य सङ्कल्पं तर्कयन्ति। आश्चर्यं खलु एतत्।

चित्रं तदेतत् पशुनाऽतिशीघ्रं मनोरथं मे निपुणं निरूप्य।
आनीतमेतद् कमलं तडागात् सुबुद्धिमान् मे खलु सारमेयः॥"

---

## GLOSSARY

| | | | |
|---|---|---|---|
| कविः | Poet | सारमेयः | Dog |
| तडागः | Pond | तरङ्गः | Tide |
| शिला | Rock | कमलम् | Lotus |
| पाटलम् | Pale-red colour | वर्तुला | Spherical |

| | | | |
|---|---|---|---|
| दलानि | Petals | चेष्टितम् | Tried |
| अनयत् | Took | अपश्यत् | Saw |
| अयतत् | Tried | असर्पत् | Moved |
| अतरत् | Swam | वेत्रयष्टिः | Walking stick with a curve as handle |

## अभ्यासः

अ. *संस्कृतेन उत्तरत।*

१. कः कवेः प्रियः आसीत् ?

२. कविः तं कुत्र अनयत् ?

३. कविः तडागे किम् अपश्यत् ?

४. कीदृशः आसीत् कमलस्य वर्णः ?

५. कमलं गृहीतुं कविः कथं प्रयत्नम् अकरोत् ?

६. कमलं गृहीतुं सारमेयः किम् अकरोत् ?

# 1. अस्माकं देशः

अस्माकं देशस्य प्राचीनं नाम भारतं वर्तते। सम्प्रति अस्य 'हिन्दुस्तान्', 'हिन्द्', 'इण्डिया' इत्यपि नामानि सन्ति। अस्य पूर्वदिशायां ब्रह्मदेशः (बर्मा), बङ्गलादेशश्च अस्ति। दक्षिणदिशायां श्रीलङ्का अस्ति। पश्चिमदिशायां पाकिस्तान् अफगानिस्तान् च अस्ति। उत्तरदिशायां चीनदेशः नेपालदेशश्च अस्ति।

अयं देशः पूर्वं एकः महान् अखण्डः विशालदेशः आसीत्। परन्तु सम्प्रति अयं गौराङ्गाणां दुर्नीत्या यवनानां दुराग्रहेण च खण्डितः संवृत्तो वर्तते।

अस्माकं देशः संसारस्य देशेषु अति पुरातनः देशः अस्ति। अयं ज्ञानस्य धर्मस्य च आदिजन्मभूमिः अस्ति। अत्रैव वेदानां प्रादुर्भावः बभूव। अत्रैव ऋषयः ज्ञानस्य कर्मणश्च विकासं कृतवन्तः। अत्रैव मानवसभ्यता सर्वप्रथमं जन्म लेभे। इतः एव संसारे सर्वत्र सभ्यतायाः प्रचारो बभूव।

एष देशः महापुरुषाणां प्रसिद्धं जन्मस्थानम् अस्ति। अत्र रामसदृशाः पितृभक्ताः बभूवुः। अत्र भरतसदृशाः भ्रातरः अजायन्त। अत्र हरिश्चन्द्रसदृशाः सत्यावादिनः उत्पेदिरे। अत्र

भीष्मसदृशाः बालब्रह्मचारिणः बभूवुः। अत्र हनुमत्सदृशाः स्वामिभक्ताः अभवन्। अत्र शिबिदधीचिसदृशाः दानवीरा अभवन्। अत्र बुद्धमहावीरसदृशाः महात्मानः प्रादुर्बभूवुः। अत्रैव शङ्कररामानुजसदृशाः विश्वविश्रुता आचार्या जाताः। अस्य महिमा अवर्णनीयः अस्ति। अस्य गौरवम् अतुलनीयम् अस्ति। अयं देशः एतादृशः गौरवशाली भूत्वा अपि दुर्दैववशात् मध्ये परतन्त्रतां गतः आसीत्। परन्तु सम्प्रति पुनरपि स्वतन्त्रतां लब्धवान् अस्ति। अस्य उत्कर्षाय सर्वेऽपि भारतवासिभिः जनैः प्रयत्नः कर्तव्यः।

---

## 2. दीपावलिः

यथा होलिका भारतस्य एकं महत् पर्व वर्तते तथैव दीपावलिः अपि एकं महत् पर्व अस्ति। इदं कार्त्तिकमासस्य कृष्णपक्षे अमावास्यायां भवति। अस्मिन् पर्वणि सर्वत्र विशेषरूपेण दीपाः ज्वलन्ते। अत एव अस्य नाम दीपावलि इति वर्तते।

अस्मिन् दिने सर्वे जनाः स्वगृहाणि परिष्कुर्वन्ति। अन्तः बहिः अधः उपरि पश्चात् पुरस्तात् सर्वत्र सम्मार्जना विधीयते। केचन स्वगृहं मृत्तिकया लेपयन्ति। केचन सुधया लेपयन्ति। केचन नानाविधैः वर्णैः स्वगृहाणि भूषयन्ति। बहवः पल्लवपुष्पादिना अपि स्वगृहाणि अलङ्कुर्वन्ति।

ततः सायङ्काले सर्वेजनाः स्वगृहेषु दीपान् ज्वालयन्ति। नगरवासिनः जनाः स्वगृहेषु विद्युद्वर्तिका अपि प्रकाशयन्ति। गृहेषु मन्दिरेषु कोष्ठेषु अलिन्देषु द्वारेषु सर्वत्र दीपाः ज्वलन्ते। अस्मिन् दिने चतुर्दिक्षु दीपा एव दृष्टिपथम् आयान्ति। सर्वाः दिशः गगनमण्डलं च प्रकाशमयं भवति। अस्य दिनस्य सायङ्कालिकी शोभा अतुलनीया भवति। अवर्णनीया भवति। नगरेषु सर्वे जनाः अस्याः शोभायाः दर्शनाय परितः भ्रमन्ति।

अस्मिन् देशे रात्रौ लक्ष्मीपूजनं भवति। तत्रापि वणिजः विशेषरूपेण लक्ष्मीपूजां कुर्वन्ति। वार्षिकाऽऽयव्ययादिकं गणयन्ति। एतस्मिन् दिने सर्वे नवीनानि पात्राणि वस्त्राणि च क्रीणन्ति।

अस्मिन् दिने रात्रिपर्यन्तं जनाः जागरणं कुर्वन्ति। इतस्ततः भ्रमन्ति दीपमालाश्च अवलोकयन्ति क्रीडन्ति मोदन्ते च। अस्यां रात्रौ अन्तिमे प्रहरे स्त्रियः शूर्पान् वादयित्वा गृहात् दरिद्रतायाः निस्सारणं कुर्वन्ति। एवं प्रकारेण दीपावलिः प्रतिवर्षमागत्य प्रत्येकं गृहं शोभयति सर्वेषामुल्लासं वर्धयति च।

---

## 3. संस्कृतप्रचारस्य आवश्यकता

संस्कृतभाषा अस्माकं देशस्य सर्वप्राचीना भाषा अस्ति। सम्प्रति अस्माकं देशे अनेकाः भाषाः प्रचलिताः सन्ति। यथा हिन्दी-बङ्गला-मराठी-गुजराती-उडिया-आसामिप्रभृतयः। आभ्यः पूर्वं पालीप्राकृताऽऽपभ्रंशप्रभृतयः भाषाः प्रचलिताः आसन्। आसां सर्वासामपि भाषाणां जननी संस्कृतभाषा एव अस्ति। संस्कृतभाषायाम् एव एतासां भाषाणाम् उत्पत्तिः जातः। अत एव इमाः भाषाः संस्कृतस्य पुत्र्यः निगद्यन्ते। अत एव अद्यापि संस्कृतभाषा जननी इव आसां भाषाणां पालनं पोषणं संवर्द्धनं च कुर्वन्ती अवलोक्यते। एवमेव दक्षिणभारते याः तमिल्-तेलुगु-कन्नड-मलयालम्-प्रभृतयः भाषाः प्रचलन्ति, तासामपि संस्कृतेन सह घनिष्टः सम्बन्धो वर्तते।

अस्माकं भारतीयानां समस्तं साहित्यमपि संस्कृतभाषायामेव वर्तते। वेदाः उपवेदाः वेदाङ्गानि दर्शनशास्त्राणि धर्मशास्त्रम् अर्थशास्त्रं पुराणानि उपपुराणानि काव्यं नाटकञ्चेत्यादि समस्तमपि विशालं ज्ञानविज्ञानवैभवं संस्कृतभाषायामेव निबद्धं

वर्तते। ब्राह्मणसाहित्यातिरिक्तं जैनधर्मस्य बौद्धधर्मस्य च महत्त्वपूर्णाः ग्रन्थाः संस्कृतभाषायामेव लिखिताः सन्ति।

अस्माकं सम्पूर्णः इतिहासोऽपि भाषायां निबद्धः वर्तते। देवासुराणाम् आख्यानम् अवतारकथाः महापुरुषाणां चरित्राणि राजनीतयः वृत्तान्ताः वंशोपवंशानां विस्तृतवर्णनं भारतीयानां विदेशेषु गमनं स्वसंस्कृतेः प्रचारश्चेति सर्वमपि भारतीयम् इतिवृत्तं संस्कृतभाषायां रामायण-महाभारत-पुराण-प्रभृतिषु ग्रन्थेषु समुल्लिखितं वर्तते। संस्कृतम् ऋते भारतीयेतिवृत्तपरिज्ञानाय न अन्यः कोऽपि पन्था विद्यते।

इत्थमेव भारतीयानां धर्म-संस्कृति-सभ्यता-सदाचारादिविषयाणाम् अपि संस्कृतग्रन्थेभ्य एव ज्ञानं लब्धुं शक्यते।

एतेन इदं सिद्धं भवति यत् संस्कृतभाषायाः ज्ञानं विना भारतीयानां धर्मः साहित्यं संस्कृतिः सभ्यता इतिहासः कला ज्ञानं विज्ञानं रीतिः नीतिर्वा किमपि यथार्थरूपेण न ज्ञातुं शक्यते। अनेनैव कारणेन भारतीयजनानां कृते संस्कृतशिक्षायाः महती आवश्यकता वर्तते। यस्य संस्कृतज्ञानं न भवति तस्मै भारतस्य किमपि ज्ञानं न भविष्यति। एतदतिरिक्तं भारतराष्ट्रस्य विभिन्नप्रदेशेषु सांस्कृतिकदृष्ट्या

ऐक्यसंरक्षणाय अपि संस्कृतस्य महती उपयोगिता अस्ति इत्यपि ध्यातव्यम्।

अद्याऽवधि संस्कृतभाषा भारतीयैः उपेक्षिता आसीत्। बहवः इमां मृतभाषा इति वदन्ति स्म। परन्तु किम् इयं भाषा वस्तुतः उपेक्षणीया वा मृता वा आसीत् कदापि ? नैव। इयं दुर्बुद्धिस्तु केवलं दास्यवशात् अस्मासु समागता आसीत्। प्रसन्नतायाः अयं विषयो वर्तते यत् स्वतन्त्रतायां प्राप्तायां दास्यरूपात् दुर्ग्रहात् निर्मुक्ताः सर्वेऽपि भारतीयाः सम्प्रति संस्कृतप्रचारस्य महत्त्वं उपयोगिता च अङ्गीकुर्वन्ति। भारतस्य कृते इदं शुभलक्षणं वर्तते यत् राष्ट्रं स्वकीयस्य साहित्यस्य स्वकीयायाः संस्कृतेश्च संरक्षणं संवर्द्धनं च करोति। यः देशः तथा न करोति, सः देशः कदापि समुन्नतिं न प्राप्नोति। इदं सर्वसम्मतं तथ्यं वर्तते। आशास्महे यत् संस्कृतेः संरक्षणदृश्ट्या सर्वे भारतीयाः संस्कृतभाषायाः प्रचारस्य प्रयत्नं करिष्यन्ति इति॥

---

# सौन्दर्यलहरी

## (जगद्गुरु श्रीआदिशङ्कराचार्यविरचिता)

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥१॥

*Lord Śiva*, will be able to do creation in this world only along with his consort *Goddess Śakti*, without her, he cannot move even an inch. Therefore you are worshipped by all the Devata-s (*Lord Viśṇu*, *Lord Śiva* and *Lord Brahmā*) and without your worship, how can one progress in good deeds.

तनीयांसं पांसुं तव चरणपङ्केरुहभवं
विरिञ्चिस्सञ्चिन्वन् विरचयति लोकानविकलम् ।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरस्संक्षुद्यैनं भजति भसितोद्धूलनविधिम् ॥२॥

Lord Brahma, the creator of the universe, selects a dust from your feet and creates this world. The great Adiśesa with his thousand heads, somehow carries a dust

of your feet, with effort great, and the great Lord Rudra, takes it and powders it nicely, and uses it as the Bhasma.

अविद्यानामन्तस्तिमिरमिहिरद्वीपनगरी
जडानां चैतन्यस्तबकमकरन्दस्त्रुतिझरी ।
दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ
निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवति ॥३॥

Oh Goddess ! For those who are with less knowledge, you are like the sun which eliminates the darkness of ingorance; For the unfortunates, you are like the honey that flows from the bouquet of flowers of vital action; For the poor, you are like the garland of precious gems and for those who were drowned in this sea of birth cycle, you are like the teeth of *Lord Varāha*, one of the *Avatāra* of *Lord Viśṇu*.

त्वदन्यः पाणिभ्यामभयवरदो दैवतगणः
त्वमेका नैवासि प्रकटितवराभीत्यभिनया ।
भयात् त्रातुं दातुं फलमपि च वाञ्छासमधिकं
शरण्ये लोकानां तव हि चरणावेव निपुणौ ॥४॥

All gods except you give refuge and grants wishes, with their hands, but you are the only one who

never shows the hands while granting wishes or giving refuge. Your holy feet are enough to save us from danger and to grant wishes.

हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं
पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत् ।
स्मरोऽपि त्वां नत्वा रतिनयनलेह्येन वपुषा
मुनीनामप्यन्तः प्रभवति हि मोहाय महताम् ॥५॥

After worshipping you, who grant all the good things, to those who bow at your feet, the *Lord Viśṇu*, took the feminine form of *Mohinī*, and moved the mind of *Lord Śiva*, to fall in love. After worshipping you, *Manmatha*, took the form like nectar, which was drunk by the eyes by his wife *Rati*, to create passion, even in the mind of the great Sages.

धनुः पौष्पं मौर्वी मधुकरमयी पञ्च विशिखाः
वसन्तः सामन्तो मलयमरुदायोधनरथः ।
तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपाम्
अपाङ्गात्ते लब्ध्वा जगदिद-मनङ्गो विजयते ॥६॥

*Manmatha's* bow is made of flowers; bow-string is made of honey bees. His five arrows are made of only

tender flowers. The spring season is as his minister, and he travels on the chariot of breeze from *Malaya Mountains*. *Manmatha* does not have a body, and so he is able to win the entire world alone. Oh daughter of *Himālaya*! All these happen just with your little blessings.

क्वणत्काञ्चीदामा करिकलभकुम्भस्तननता
परिक्षीणा मध्ये परिणतशरच्चन्द्रवदना ।
धनुर्बाणान् पाशं सृणिमपि दधाना करतलैः
पुरस्तादास्तां नः पुरमथितुराहोपुरुषिका ॥७॥

With a golden belt, adorned with tiny tingling bells; breasts slightly bent which are like the two frontal globes of calf of an elephant; with a thin pretty form, with a face like the autumn moon, and with holding a bow, five arrows, the noose and goad in the hands, as the wonderful form, of the ego of the God who burnt the three cities, you should be before us.

सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे ।
शिवाकारे मञ्चे परमशिवपर्यङ्कनिलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम् ॥८॥

You in a form like a tide in the sea of happiness of ultimate truth. You sit on the holy seat which is placed on a stage of triangular form in a house of gems, which is again in the garden of *Kadamba* trees and surrounded by wish-giving trees *Kalpavrkṣa* in the island of precious gems which is in the middle of the sea of nectar. There are only few people who worship you in this form.

**महीं मूलाधारे कमपि मणिपूरे हुतवहं**
**स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि।**
**मनोऽपि भ्रूमध्ये सकलमपि भित्वा कुलपथं**
**सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥९॥**

Oh Goddess, you reached the *Sahasrārcakra* after breaking through the micro ways, of the power of earth in *Mūlādhāra*; of the power of water in *Maṇipūra*; of the power of fire in *Svādhiśṭhāṇa*; of the power of air in the

heart, and of the power of ether in between the eyelids to live in seclusion with your consort, in the *Sahasrārcakra*.

सुधाधारासारैश्चरणयुगलान्तर्विगलितैः
प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नायमहसः।
अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ॥१०॥

The shower of nectar that flows in between your feet harvests the entire the world all, and though all the six Cakras, reaching back to your place, and coiling your body into a ring like serpant, you sleep in the *Kulakuṇḍa* with a hole in the middle.

# सन्धिपरिचयः

द्वयोः वर्णयोः सन्निधौ यदा विकारः भवति तदा सन्धिः इति उच्यते। विकारः नाम कस्यचित् वर्णस्य परिवर्तनं, योजनम्, अदर्शनं वा।

सन्धिः त्रिधा भवन्ति –

1. स्वरसन्धिः 2. व्यञ्जनसन्धिः 3. विसर्गसन्धिः

**स्वरसन्धेः प्रकाराः –**

सवर्णदीर्घसन्धिः गुणसन्धिः

वृद्धिसन्धिः यणसन्धिः

पूर्वरूपसन्धिः यान्तावान्तादेशसन्धिः

**व्यञ्जनसन्धेः प्रकाराः –**

श्चुत्वसन्धिः ष्टुत्वसन्धिः

जश्त्वसन्धिः अनुनासिकसन्धिः

अनुस्वारसन्धिः परसवर्णसन्धिः

ङमुडागमसन्धिः छत्वसन्धिः

# सन्धिपरिचयः

द्वयोः वर्णयोः सन्निधौ यदा विकारः भवति तदा सन्धिः इति उच्यते। विकारः नाम कस्यचित् वर्णस्य परिवर्तनं, योजनम्, अदर्शनं वा।

सन्धिः त्रिधा भवन्ति –

1. स्वरसन्धिः 2. व्यञ्जनसन्धिः 3. विसर्गसन्धिः

**स्वरसन्धेः प्रकाराः –**

सवर्णदीर्घसन्धिः गुणसन्धिः

वृद्धिसन्धिः यणसन्धिः

पूर्वरूपसन्धिः यान्तावान्तादेशसन्धिः

**व्यञ्जनसन्धेः प्रकाराः –**

श्चुत्वसन्धिः ष्टुत्वसन्धिः

जश्त्वसन्धिः अनुनासिकसन्धिः

अनुस्वारसन्धिः परसवर्णसन्धिः

ङमुडागमसन्धिः छत्वसन्धिः

## 1. स्वरसन्धिः

### सवर्णदीर्घसन्धिः

1. उत्तर + अयनम् = उत्तर् + अ + अ + यनम्
   = उत्तर् + आ + यनम्
   = उत्तरायनम्

2. शङ्कर + आचार्यः = शङ्कर् + अ + आ + चार्यः
   = शङ्कर् + आ + चार्यः
   = शङ्कराचार्यः

3. प्रसन्ना + अस्तु = प्रसन्न् + आ + अ + स्तु
   = प्रसन्न् + आ + स्तु
   = प्रसन्नास्तु

4. विद्या + आलयः = विद्य् + आ + आ + लयः
   = विद्य् + आ + लयः
   = विद्यालयः

5. गच्छति + इति = गच्छत् + इ + इ + ति
   = गच्छत् + ई + ति
   = गच्छतीति

6. भगिनी + इव = भगिन् + ई + इ + व

= भगिन् + ई + व

= भगिनीव

7. सर्वज्ञानी + ईश्वरः = सर्वज्ञान् + (ई + ई) + श्वरः

= सर्वज्ञान् + ई + श्वरः

= सर्वज्ञानीश्वरः

8. गुरु + उपदेशः = गुर् + उ + उ + पदेशः

= गुर् + ऊ + पदेशः

= गुरूपदेशः

---

**ध्यातव्यम्**

अ / आ + अ / आ = आ

इ / ई + इ / ई = ई

उ / ऊ + उ / ऊ = ऊ

# गुणसन्धिः

1. मम + इदम् = मम् + अ + इ + दम्
   = मम् + ए + दम्
   = ममेदम्

2. कल्पलता + इव = कल्पलत् + आ + इ + व
   = कल्पलत् + ए + व
   = कल्पलतेव

3. बालिका + ईक्षते = बालिक् + आ + ई + क्षते
   = बालिक् + ए + क्षते
   = बालिकेक्षते

4. पर + उपकारः = पर् + अ + उ + पकारः
   = पर् + ओ + पकारः
   = परोपकारः

5. त्वया + उक्तम् = त्वय् + आ + उ + क्तम्
   = त्वय् + ओ + क्तम्
   = त्वयोक्तम्

6. च + ऊर्ध्वम् = च् + अ + ऊ + र्ध्वम्
   = च् + ओ + र्ध्वम्
   = चोर्ध्वम्

7. देव + ऋणम् = देव् + अ + ऋ + णम्

= देव् + अर् + णम्

= देवर्णम् ।

8. महा + ऋषिः = मह् + आ + ऋ + षिः

= मह् + अर् + षिः

= महर्षिः

---

**ध्यातव्यम्**

अ / आ + इ / ई = ए

अ / आ + उ / ऊ = ओ

अ / आ + ऋ / ॠ = अर्

## वृद्धिसन्धिः

एतानि उदाहरणानि परिशीलयन्तु –

| | | | |
|---|---|---|---|
| 1. | न + एव | = | न् + अ + ए + व |
| | | = | न् + ऐ + व |
| | | = | नैव |
| 2. | तथा + एव | = | तथ् + आ + ए + व |
| | | = | तथ् + ऐ + व |
| | | = | तथैव |
| 3. | तव + ऐश्वर्यम् | = | तव् + अ + ऐ + श्वर्यम् |
| | | = | तव् + ऐ + श्वर्यम् |
| | | = | तवैश्वर्यम् |
| 4. | राजा + ऐश्वर्यम् | = | राज् + आ + ऐ + श्वर्यम् |
| | | = | राज् + ऐ + श्वर्यम् |
| | | = | राजैश्वर्यम् |
| 5. | मन्त्र + ओषधि: | = | मन्त्र् + अ + ओ + षधिः |
| | | = | मन्त्र् + औ + षधिः |
| | | = | मन्त्रौषधि: |
| 6. | शर्करा +ओदनम् | = | शर्कर् + आ + ओ + दनम् |
| | | = | शर्कर् + औ + दनम् |
| | | = | शर्करौदनम् |

7. तस्य + औदासीन्यम् = तस्य् + अ + औ + दासीन्यम्

= तस्य् + औ + दासीन्यम्

= तस्यौदासीन्यम्

8. महा + औषधम् = मह् + आ + औ + षधम्

= मह् + औ + षधम्

= महौषधम्

---

**ध्यातव्यम्**

अ / आ + ए / ऐ = ऐ

अ / आ + ओ / औ = औ

# यण् – सन्धिः

1. क्रीडन्ति + अत्र = क्रीडन्त् + इ + अ + त्र
= क्रीडन्त् + य् + अ + त्र
= क्रीडन्त्यत्र

2. अति + आहारः = अत् + इ + आ + हारः
= अत् + य् + आ + हारः
= अत्याहारः

3. इति + उच्यते = इत् + इ + उ + च्यते
= इत् + य् + उ + च्यते
= इत्युच्यते

4. कति + ऊष्माणः = कत् + इ + ऊ + ष्माणः
= कत् + य् + ऊ + ष्माणः
= कत्यूष्माणः

5. हि + एव = ह् + इ + ए + व
= ह् + य् + ए + व
= ह्येव

6. सरस्वती + ऐश्वर्यम् = सरस्वत् + ई + ऐ + श्वर्यम्
= सरस्वत् + य् + ऐ + श्वर्यम्
= सरस्वत्यैश्वर्यम्

7. दधि + ओदनम् = दध् + इ + ओ + दनम्

= दध् + य् + ओ + दनम्

= दध्योदनम्

8. देवी + औदार्यम् = देव् + ई + औ + दार्यम्

= देव् + य् + औ + दार्यम्

= देव्यौदार्यम्

9. मधु + अरिः = मध् + उ + अ + रिः

= मध् + व् + अ + रिः

= मध्वरिः

10. सु + आगतम् = स् + उ + आ + गतम्

= स् + व् + आ + गतम्

= स्वागतम्

11. तु + इदम् = त् + उ + इ + दम्

= त् + व् + इ + दम्

= त्विदम्

12. सर्वेषु + ईश्वरः = सर्वेष् + उ + ई + श्वरः

= सर्वेष् + व् + ई + श्वरः

= सर्वेष्वीश्वरः

13. तु + एव = त् + उ + ए + व
= त् + व् + ए + व
= त्वेव

14. तासु + ऐक्यम् = तास् + उ + ऐ + क्यम्
= तास् + व् + ऐ + क्यम्
= तास्वैक्यम्

15. बहु + ओजः = बह् + उ + ओ + जः
= बह् + व् + अ + जः
= बह्वोजः

16. कटु + औषधम् = कट् + उ + औ + षधम्
= कट् + व् + औ + षधम्
= कट्वौषधम्

17. वधू + ऐश्वर्यम् = वध् + ऊ + ऐ + श्वर्यम्
= वध् + व् + ऐ + श्वर्यम्
= वध्वैश्वर्यम्

18. पितृ + आज्ञा = पित् + ऋ + आ + ज्ञा
= पित् + र् + आ + ज्ञा
= पित्राज्ञा

---

**ध्यातव्यम्**

इ / ई + स्वरः (इ, ई विहाय) = इ / ई स्थाने य्

उ / ऊ + स्वरः (उ, ऊ विहाय) = उ / ऊ स्थाने व्

ऋ / ॠ + स्वरः (ऋ, ॠ विहाय) = ऋ / ॠ स्थाने र्

ऌ + स्वरः = ऌ स्थाने ल्

# यान्तावान्तादेशसन्धिः

| | | |
|---|---|---|
| 1. हरे + ए | = | हर् + ए + ए |
| | = | हर् + अय् + ए |
| | = | हरये |
| 2. पो + अनः | = | प् + ओ + अ + नः |
| | = | प् + अव् + अ + नः |
| | = | पवनः |
| 3. नै + अकः | = | न् + ऐ + अ + कः |
| | = | न् + आय् + अ + कः |
| | = | नायकः |
| 4. रौ + अणः | = | र् + औ + अ + णः |
| | = | र् + आव् + अ + णः |
| | = | रावणः |

**ध्यातव्यम्**

ए + स्वरः = अय् + स्वरः

ऐ + स्वरः = आय् + स्वरः

ओ + स्वरः = अव् + स्वरः

औ + स्वरः = आव् + स्वरः

## पूर्वरूपसन्धिः

1. ते + अत्र = त् + ए + अ + त्र
   = त् + ए + ऽ + त्र
   = तेऽत्र

2. को + अपि (कः + अपि)
   = क् + ओ + अ + पि
   = क् + ओ + ऽ + पि
   = कोऽपि

---

**ध्यातव्यम्**

ए / ओ + अ = एऽ / ओऽ

## 2. व्यञ्जनसन्धिः

### श्चुत्वसन्धिः (श् च् छ् ज् झ् ञ्)

1. हरिस् + शोते = हरि + स् + श् + एते

= हरि + श् + श् + एते

= हरिश्शेते।

2. रामस् + च = राम + स् + च

= राम + श् + च

= रामश्च

3. रामस् + छात्रः = राम + स् + छ् + आत्रः

= राम + श् + छ् + आत्रः

= रामश्छात्रः

एतेषु उदाहरणेषु विसर्गस्य सकारादेशः। तत्र सकारस्य स्थाने शकारादादेशः सम्पन्नः। स च विसर्गसन्धेः निमित्तम् अस्ति।

4. भगवत् + शरणम् = भगव + त् + श + रणम्

= भगव + च् + श + रणम्

= भगवच्शरणम् / भगवच्छरणम्

5. तस्मात् + च = तस्मा + त् + च

= तस्मा + च् + च

= तस्माच्च

6. बृहत् + छत्रम् = बृह + त् + छत्रम्

= बृह + च् + छत्रम्

= बृहच्छत्रम्

7. तस्मात् + जायते = तस्मा + त् + जायते

= तस्मा + ज् + जायते

= तज्जपः

8. सत् + जयः = स + त् + ज + यः

= स + ञ् + ज + यः

= सञ्जयः

---

**ध्यातव्यम्**

स् + श् / चवर्गः = श् + श् / चवर्गः

तवर्गः + श् / चवर्गः = चवर्गः + श् / चवर्गः

## षटुत्वसन्धिः (ष् ट् ठ् ड् ढ् ण)

| | | | |
|---|---|---|---|
| 1. | बालस् + षष्ठः | = | बाल + स् + ष् + अष्ठः |
| | | = | बाल + ष् + षष्ठः |
| | | = | बालष्षष्ठः |
| 2. | बृहत् + टीका | = | बृह + त् + ट् + ईका |
| | | = | बृह + ट् + ट् +ईका |
| | | = | बृहट्टीका |
| 3. | आकृष् + तः | = | आकृष् + त् + अः |
| | | = | आकृ + ष् + ट् + अः |
| | | = | आकृष्टः |
| 4. | षण् + नाम् | = | ष + ण् + न् + आम् |
| | | = | ष + ण् + ण् + आम् |
| | | = | षण्णाम् |

---

**ध्यातव्यम्**

षकारटवर्गाभ्यां योगे सकारस्य षकारः, टवर्गेण योगे तवर्गस्य टवर्गादेशो भवति।

## जश्त्वसन्धिः (ज् ब् ग् ड् द्)

| | | | |
|---|---|---|---|
| 1. | तत् + अपि | = | त + त् + अ + पि |
| | | = | त + द् + अ + पि |
| | | = | तदपि |
| 2. | वाक् + ईशः | = | वा + क् + ई + शः |
| | | = | वा + ग् + ई + शः |
| | | = | वागीशः |
| 3. | तत् + इव | = | त + त् + इ + व |
| | | = | त + द् + इ + व |
| | | = | तदिव |
| 4. | तस्मात् + वा | = | तस्मा + त् + व् + आ |
| | | = | तस्मा + द् + व् + आ |
| | | = | तस्माद्वा |
| 5. | वाक् + भूषणम् | = | वा + क् + भ् + ऊषणम् |
| | | = | वा + ग् + भ् + ऊषणम् |
| | | = | वाग्भूषणम् |

6. जगत् + गुरुः = जग + त् + ग् + उरुः

= जग + द् + ग् + उरुः

= जगद्गुरुः

---

**ध्यातव्यम्**

जश् = ज् ब् ग् ड् द् इत्येते वर्णाः (वर्गीयतृतीयवर्णाः)

वर्गीयव्यञ्जनानि + स्वरः = जश् (तद्वर्गीयः) + स्वरः

वर्गीयव्यञ्जनानि + मृदुव्यञ्जनम् (जश्) = जश् + मृदुव्यञ्जनम्

ञमङणनान् विना पदान्ते स्थितस्य वर्गीयव्यञ्जनस्य स्वरे मृदुव्यञ्जने वा परे तद्वर्गीयतृतीयव्यञ्जनस्य आदेशो भवति।

## अनुनासिकसन्धिः (ञ् म् ङ् ण् न्)

1. वाक् + मयः = वा + क् + म + यः

= वा + ङ् + म + यः

= वाङ्मयः

2. षड् + मुखः = ष + ड् + मु + खः

= ष + ण् + मु + खः

= षण्मुखः

3. जगत् + नाथः = जग + त् + ना + थः

= जग + न् + ना + थः

= जगन्नाथः

---

**ध्यातव्यम्**

वर्गीयव्यञ्जनवर्णः + अनुनासिकवर्णः = तद्वर्गीय अनुनासिकवर्णः

# अनुस्वारसन्धिः

1. गुरुम् + वन्दे = गुरुं वन्दे
2. वाक्यम् + शृणोतु = वाक्यं शृणोतु
3. सत्यम् + वद = सत्यं वद
4. धर्मम् + चर = धर्मं चर

---

**ध्यातव्यम्**

व्यञ्जने परे पदान्ते स्थितस्य मकारस्य अनुस्वारो भवति।

म् + व्यञ्जनम् = ं + व्यञ्जनम्

स्वरे परे तु अनुस्वारलेखनं न युक्तम्।

# परसवर्णसन्धिः

| | | | |
|---|---|---|---|
| 1. | त्वं + करोषि | = | त्व + ं + करोषि |
| | | = | त्व + ङ् + करोषि |
| | | = | त्वङ्करोषि |
| 2. | किं + नाम | = | कि + ं + नाम |
| | | = | कि + न् + नाम |
| | | = | किन्नाम |
| 3. | क्रोधं + जित्वा | = | क्रोध + ं + जित्वा |
| | | = | क्रोध + ञ् + जित्वा |
| | | = | क्रोधञ्जित्वा |

अनुस्वारस्य वर्गीयव्यञ्जने परे तद्वर्गस्य पञ्चमो वर्णः आदेशरूपेण भवति।

| | | | |
|---|---|---|---|
| 4. | तत् + लीनः | = | त + त् + लीनः |
| | | = | त + ल् + लीनः |
| | | = | तल्लीनः |
| 5. | श्रद्धावान् + लभते | = | श्रद्धावा + न् + लभते |
| | | = | श्रद्धावा + लँ + लभते |
| | | = | श्रद्धावाल्लँभते। |

## ध्यातव्यम्

अनुस्वारः + वर्गीयव्यञ्जनम् = ञ् म् ङ् ण् न्

तवर्गः + ल = ल् / लँ + ल

तवर्गस्य लकारे परे लकारादेशो भवति। यदि तत्र नकारः तर्हि तस्य अनुनासिकलकारो (लँ) भवति।

## ङमुडागमसन्धिः

| | | |
|---|---|---|
| तस्मिन् + एव | = | तस्मि + न् + ए + व |
| | = | तस्मि + न् + न् + ए + व |
| | = | तस्मिन्नेव |

---

**ध्यातव्यम्**

ह्रस्वपूर्वकाः ङ् / ण् / न् + स्वरः
= ङ् / ण् / न् + ङ् / ण् / न् + स्वरः

## CASE STUDIES

### Case Study 1: Importance of Time in Education

A student continuously postpones studies and spends most of the time on social media. Before exams, the student becomes stressed and unable to complete preparation.

Using the śloka:
“□□□□□□ □□□□□□□□…”
analyze:

- Mistakes made by the student
- Importance of gradual learning
- Time management techniques for students

### Case Study 2: Respect Towards Teachers

A student interrupts teachers frequently and behaves casually in class. Other students begin copying the same behavior.

**Using:**

**“गुरूणां सदने…”**

**discuss:**

- Importance of discipline in education
- Guru–Śiṣya relationship
- Effects of disrespectful behavior in learning environments

### Case Study 3: Decline of Sanskrit Learning

A university plans to reduce Sanskrit courses because students believe Sanskrit has no modern relevance.

**Using:**

**“संस्कृतभाषायाः आवश्यकता”**

**discuss:**

- Importance of Sanskrit in Indian culture

- Role of Sanskrit in philosophy and literature
- Methods to promote Sanskrit among youth

## Case Study 4: Celebrating Festivals Without Values

Students celebrate Deepavali mainly with fireworks and entertainment but ignore its spiritual and cultural significance.

**Using:**

**“दीपावलिः”**

**analyze:**

- Real meaning of Deepavali
- Importance of light as a symbol of knowledge
- Ways to celebrate festivals responsibly

## Case Study 5: Spiritual Emptiness in Modern Life

A young professional earns wealth and success but feels mentally disturbed and spiritually empty.

Using the first ten ślokas of *Soundarya Lahari*:

- Explain the importance of devotion
- Discuss the role of Divine Mother worship
- Suggest spiritual practices for inner peace

**Discussion Forum 1**

**Topic: “Can Shiva function without Shakti?”**
**Discuss the philosophical meaning of the first śloka.**

**Discussion Forum 2**

**Topic: “What is the role of the Divine Feminine in Indian philosophy?”**
**Discuss using examples from *Soundarya Lahari*.**

**Discussion Forum 3**

**Topic: “Is devotional poetry relevant to modern youth?”**
**Discuss literary and spiritual value of *Soundarya Lahari*.**

**Discussion Forum 4**

**Topic: “Can chanting sacred hymns improve mental peace?”**
**Discuss the psychological and spiritual impact of devotional recitation.**

**Discussion Forum 5**

**Topic: “Should Sanskrit devotional literature be taught in modern education?”**
**Discuss benefits and challenges of including texts like *Soundarya Lahari* in curriculum.**

b) Supreme Divine Mother
c) River Goddess
d) Forest deity
**Answer:** b) Supreme Divine Mother

4. Which of the following is frequently described in the first ten ślokas?
a) Battles and wars
b) Nature and animals
c) The beauty and power of Devi
d) Political ideas
**Answer:** c) The beauty and power of Devi
5. According to *Soundarya Lahari*, the Goddess grants:
a) Only wealth
b) Only victory
c) Spiritual wisdom and blessings
d) Only fame
**Answer:** c) Spiritual wisdom and blessings
6. *Soundarya Lahari* is traditionally attributed to:
a) Kalidasa
b) Vedavyasa
c) Adi Shankaracharya
d) Valmiki
**Answer:** c) Adi Shankaracharya

## Assignment 4: Guru, Discipline, and Spiritual Learning

Using:

- “□□□□□□□ □□□□…”
- Devotional discipline in *Soundarya Lahari*

Explain:

- Importance of Guru–Śiṣya tradition
- Respect and humility in learning
- Spiritual discipline in daily life

## Assignment 5: India’s Heritage and Sanskrit Tradition

Using:

- “□□□□□□□ □□□□”
- *Soundarya Lahari* ślokas 1–10

Prepare a presentation on:

- India as a land of spirituality
- Great saints and philosophers
- Contribution of Sanskrit devotional literature to Indian heritage